[२०५] कास्यनेकाचः इति वक्तव्यम् चुलुम्पाद्यर्थम् । (म.भा. २.४४)

चकासाञ्चकार । दरिद्राञ्चकार । चुलुम्पाञ्चकार । (म.भा. २.४४)

आमोऽमित्वमदन्तत्वादगुणत्वं विदेस्तथा ।
आस्कासोरांविधानाच्च पररूपं कतन्तवत् ॥

## इजादेश्च गुरुमतोऽनृच्छः । (३६/२२३७)

इजादिर्यो धातुर्गुरुमान् [1]ऋच्छतिवर्जितः, तस्माच्च लिटि परत आम् प्रत्ययो भवति । 'ईह चेष्टायाम्' (धा.पा. ६३२) । 'ऊह वितर्के' (धा.पा. ६४८) । ईहाञ्चक्रे । ऊहाञ्चक्रे । इजादेः इति किम् ? ततक्ष । ररक्ष । गुरुमतः इति किम् ? इयज । उवप[2] । अनृच्छः इति किम् ? आनर्च्छ, आनर्च्छतुः, आनर्च्छुः ।

[२०६] ऊर्णोतेश्च प्रतिषेधो वक्तव्यः । (म.भा. २.४६)

प्रोर्णुनाव । अथ वा —

वाच्य ऊर्णोर्णुवद्भावो यङप्रसिद्धिः प्रयोजनम् ।
आमश्च [3]प्रतिषेधार्थमेकाचश्चेडुपग्रहात् ॥ (म.भा.२.४६)

## दयायासश्च । (३७/२३२४)

'दय दानगतिरक्षणेषु' (धा.पा. ४८१), 'अय गतौ' (धा.पा. ४७४), 'आस उपवेशने' (धा.पा. १०२२), एतेभ्यश्च लिटि परत आम् प्रत्ययो भवति । दयाञ्चके । [4]पलायाञ्चक्रे । आसाञ्चक्रे ॥

## उषविदजागृभ्योऽन्यतरस्याम् । (३८/२३४१)

'[5]उष दाहे' (धा.पा. ६९६), 'विद ज्ञाने' (धा.पा.१०६५), 'जागृ निद्राक्षये' (धा.पा. १०७३), एतेभ्यो लिटि परतोऽन्यतरस्याम् आम् प्रत्ययो भवति । ओषाञ्चकार, उवोष । विदाञ्चकार, विवेद । जागराञ्चकार, जजागार । विदेरदन्तत्वप्रतिज्ञानाद् आमि गुणो न भवति ॥

## भीह्रीभृहुवां श्लुवच्च । (३९/२४९१)

'ञिभी भये' (धा. पा. १०८५), 'ह्री लज्जायाम्' (धा. पा. १०८६), 'डुभृञ् धारणपोषणयोः' (धा.पा. १०८८), 'हु दानादानयोः' (धा.पा. १०८४), एतेभ्यो लिटि परतः आम् प्रत्ययो भवति अन्यतरस्याम्, श्लाविव चास्मिन् कार्यं भवति । किं पुनस्तत्[6] ? [7]द्वित्वमित्वं च । बिभयाञ्चकार, बिभाय । जिह्रयाञ्चकार, जिह्राय । बिभराञ्चकार, बभार । जुहवाञ्चकार, जुहाव ॥

## कृञ्चानुप्रयुज्यते लिटि । (४०/२२३९)

आम्प्रत्ययस्य पश्चात् कृञ् अनुप्रयुज्यते लिटि परतः । कृञ् इति प्रत्याहारेण कृभ्वस्तयो गृह्यन्ते, तत्सामर्थ्याद् अस्तेर्भूभावः (२.४.५२/२४७०) न भवति । पाचयाञ्चकार । पाचयाम्बभूव । पाचयामास ॥

---

1. ऋच्छवर्जितः क. 2. इयेष, उवोष इत्यधिकम् क.ड. 3. प्रतिषेधार्थः क. 4. अयांचक्रे ह, नास्ति ब, आपलायांचक्रे अ. 5. उषादिभ्यः धातुभ्यः ग. 6. कार्यम् इत्यधिकम् ड. 7. द्वित्वेत्वे अ. क. ड, द्वित्त्वमेत्वं ग.